শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥শ্রীমন্নারাযণীযে চতুর্দশং দশকম্॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীমন্নারাযণীযে চতুর্দশং দশকম্ ॥

## কপিলোপাখ্যানম্

সমনুস্মৃততাৱকাঙ্ঘ্রিযুগ্মঃ
 স মনুঃ পঙ্কজসম্ভৱাঙ্গজন্মা।
নিজমন্তরমন্তরাযহীনং
 চরিতং তে কথযন্ সুখং নিনায ॥ **14.1** ॥

সমযে খলু তত্র কর্দমাখ্যো
 দ্রুহিণচ্ছাযভৱস্তদীযৱাচা।
ধৃতসর্গরসো নিসর্গরম্যং
 ভগৱংস্ত্বামযুতং সমাঃ সিষেৱে ॥ **14.2** ॥

গরুডোপরি কালমেঘকম্রং
 ৱিলসৎকেলিসরোজপাণিপদ্মম্।
হসিতোল্লসিতাননং ৱিভো ৎৱং
 ৱপুরাৱিষ্কুরুষে স্ম কর্দমায ॥ **14.3** ॥

স্তুৱতে পুলকাৱৃতায তস্মৈ
 মনুপুত্রীং দযিতাং নৱাপি পুত্রীঃ।
কপিলং চ সুতং স্বমেৱ পশ্চাৎ
 স্বগতিং চাপ্যনুগৃহ্য নির্গতোঽভূঃ ॥ **14.4** ॥

স মনুশ্শতরূপযা মহিষ্যা
 গুণৱত্যা সুতযা চ দেৱহূত্যা।

ভৱদীরিতনারদোপদিষ্টঃ
    সমগাৎ কর্দমমাগতিপ্রতীক্ষম্॥ **14.5** ॥

মনুনোপহৃতাং চ দেৱহূতিং
    তরুণীরত্নমৱাপ্য কর্দমোঽসৌ।
ভৱদর্চননির্ৱৃতোঽপি তস্যাং
    দৃঢশুশ্রূষণযা দধৌ প্রসাদম্॥ **14.6** ॥

স পুনস্ত্বদুপাসনপ্রভাৱা -
    দ্দযিতাকামকৃতে কৃতে ৱিমানে।
ৱনিতাকুলসঙ্কুলো নৱাত্মা
    ৱ্যহরদ্দেৱপথেষু দেৱহূত্যা॥ **14.7** ॥

শতৱর্ষমথ ৱ্যতীত্য সোঽযং
    নৱ কন্যাঃ সমৱাপ্য ধন্যরূপাঃ।
ৱনযানসমুদ্যতোঽপি কান্তা -
    হিতকৃৎ ৎৱজ্জননোৎসুকো ন্যৱাৎসীৎ॥ **14.8** ॥

নিজভর্তৃগিরা ভৱন্নিষেৱা -
    নিরতাযামথ দেৱ দেৱহূত্যাম্।
কপিলস্ত্বমজাযথা জনানাং
    প্রথযিষ্যন্ পরমাত্মতত্ত্ৱৱিদ্যাম্॥ **14.9** ॥

ৱনমেযুষি কর্দমে প্রসন্নে
    মতসর্ৱস্ৱমুপাদিশন্ জনন্যৈ।
কপিলাত্মক ৱাযুমন্দিরেশ
    ৎৱরিতং ৎৱং পরিপাহি মাং গদৌঘাৎ॥ **14.10** ॥

॥ ইতি শ্রীমন্নারাযণীযে চতুর্দশং দশকং সমাপ্তম্॥